# Brahmadibhih Kritam Narasimha Stotram

# ब्रह्मादिभिः कृतं नरसिंहस्तोत्रम्

## Document Information

Text title : Brahmadibhih Kritam Narasimha Stotram

File name : brahmAdibhiHkRRitaMnarasiMhastotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 140/52-64||

Latest update : December 25, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2025

*sanskritdocuments.org*

# ब्रह्मादिभिः कृतं नरसिंहस्तोत्रम्

नमोऽक्षरपररूपाक्षरान्तर्यामिणे च ते ।
नमो मुक्ताभिवन्द्याय नमो व्यूहात्मने च ते ॥ ५२॥

नमः प्रकृतिरूपाय प्रधानपुरुषाय ते ।
महाकालस्वरूपाय भूमरूपाय च ते नमः ॥ ५३॥

अप्रतर्क्यस्वरूपायाऽनन्तरूपाय ते नमः ।
अभक्तनाशकर्त्रे ते भक्तरक्षणकारिणे ॥ ५४॥

वरदानानुरूपाय तथैव दैत्यघातिने ।
सर्वात्मने करालाय विकरालाय ते नमः ॥ ५५॥

यज्ञभागप्रदात्रे ते रक्षकाय नमो नमः ।
हृदि बोधाय देवानां त्रात्रे तस्मै नमो नमः ॥ ५६॥

तपोमार्गप्रवृत्ताय ऋषिगम्याय ते नमः ।
श्राद्धतृप्तिप्रदायाऽत्र परत्रदायिने नमः ॥ ५७॥

योगगतिप्रसाराय सिद्धिस्मृद्धिगृहाय च ।
तपोबलप्रकृष्टाय धर्मात्मँस्ते नमो नमः ॥ ५८॥

स्तुतिस्तुत्याय विद्यायाः शुभाधिपतये नमः ।
रत्नप्रदात्रे न्यायाय नीतिधात्रे नमो नमः ॥ ५९॥

मनुत्वसंरक्षकाय प्रजापतित्वदायिने ।
नटनाट्यगायकानां क्रीडागीत्यात्मने नमः ॥ ६०॥

वाहकत्वप्रदात्रे ते सपर्यादिप्रदायिने ।
विष्टिकार्यनियोक्त्रे ते जगदीशाय ते नमः ॥ ६१॥

वैष्णवानां रक्षकाय बहुरूपधराय ते ।
नारायणाय कृष्णाय श्रीहरये नमो नमः ॥ ६२॥

नित्यं शान्तस्वरूपायेदानीं भयङ्कराय ते ।
अविस्मृतस्वरूपायाऽद्भुताय हरये नमः ॥ ६३॥

इत्याकाशात्तुष्टुवुस्तेऽन्तिकं केऽपि न चाययुः ।
उग्रमृत्योर्मुखे गन्तुं श्रीमृते कः पतेत् श्वसन् ॥ ६४॥

इति श्रीलक्ष्मीनारायणीयसंहितायां प्रथमे कृतयुगसन्ताने १४०-अध्यायान्तर्गतं ब्रह्मादिभिः कृतं नरसिंहस्तोत्रं सम्पूर्णम् ।

लक्ष्मीनारायणीयसंहिता । खण्ड १। अध्याय १४०/५२-६४॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 140/52-64..

Proofread by PSA Easwaran

*Brahmadibhih Kritam Narasimha Stotram*
pdf was typeset on December 25, 2025

Please send corrections to *sanskrit@cheerful.com*